॥ ॐ नमो भगवते वासुदेवाय ॥

# श्रीमद् भागवत रसिक कुटुंब

## श्री बाल मुकुंद अष्टकम्

श्रीमद् भागवत का यह सार
भगवद् भक्ति ही आधार

# श्री बाल मुकुंद अष्टकम्

करारविन्देन पदारविन्दं, मुखारविन्दे विनिवेशयन्तम् ।
वटस्य पत्रस्य पुटे शयानं, बालं मुकुन्दं मनसा स्मरामि ॥ 1 ॥

सं(व्)हृत्य लोकान्वटपत्रमध्ये, शयानमाद्यन्तविहीनरूपम् ।
सर्वेश्वरं सर्वहितावतारं, बालं मुकुन्दं मनसा स्मरामि ॥ 2 ॥

इन्दीवरश्यामलकोमलाङ्गं, इन्द्रादिदेवार्चितपादपद्मम् ।
सन्तानकल्पद्रुममाश्रितानां, बालं मुकुन्दं मनसा स्मरामि ॥ 3 ॥

लम्बालकं लम्बितहारयष्टिं, शृङ्गारलीलाङ्कितदन्तपङ्क्तिम् ।
बिंबाधरं(ञ्) चारुविशालनेत्रं, बालं मुकुन्दं मनसा स्मरामि ॥ 4 ॥

शिक्ये निधायाद्यपयोदधीनि, बहिर्गतायां व्रजनायिकायाम् ।
भुक्त्वा यथेष्टं(ङ्) कपटेन सुप्तं, बालं मुकुन्दं मनसा स्मरामि ॥ 5 ॥

कलिन्दजान्तस्थितकालियस्य, फणाग्ररङ्गे नटनप्रियन्तम् ।
तत्पुच्छहस्तं शरदिन्दुवक्त्रं, बालं मुकुन्दं मनसा स्मरामि ॥ 6 ॥

उलूखले बद्धमुदारशौर्यं, उत्तुङ्गयुग्मार्जुन भङ्गलीलम् ।
उत्फुल्लपद्मायत चारुनेत्रं, बालं मुकुन्दं मनसा स्मरामि ॥ 7 ॥

आलोक्य मातुर्मुखमादरेण, स्तन्यं पिबन्तं सरसीरुहाक्षम् ।
सच्चिन्मयं(न्) देवमनन्तरूपं, बालं मुकुन्दं मनसा स्मरामि ॥ 8 ॥

॥ इति बालमुकुन्दाष्टकम् सम्पूर्णम् ॥